त्रैमासिकी / सप्टम्बर् २०२५

# गीर्वाणपत्रिका

जयति जयति गीर्वाणी सरस्वती सुरसवती । सारस्वतजनमोहिनी संस्कृतसुविलासिनी ॥



## सच्चिदानन्दरूपाय शिवाय गुरवे नमः

सप्टम्बर् २०२५

# अनुक्रमणिका


गुरूपदेशः १
निवेदनम् १
चिन्तनम् २
सुभाषितम् ३
पक्षिमित्राः भवाम । ४
प्रहेलिका ५
हिरकणी - मातृप्रेमस्य कालातीतकथा ६
गीर्वाणप्रतिष्ठातः ... ७
अनुशासनत्रयम् ८
अन्धगजन्यायः ८
बालरञ्जनी
शिवभक्तः चेन्तनारः ९
शब्दपटः १०
हास्यकणिका १०
रुचिरा ११
गजबजॅ सुक्कॅ
कैवल्योपनिषदि सप्तदशः श्लोकः १२
मम स्मृतिपथे... १३
योगविषये किञ्चित् ... १४
उत्तराणि १४

## ॥ गुरूपदेशः ॥



दशमगुरु-परमपूज्य-
श्रीमत्-परिज्ञानाश्रम-स्वामिवर्यः ।

वयं सर्वे एतस्मिन् जगति केवलं सुख-दुःखं भोक्तुं न आगताः । अपि तु अस्माकं जीवनस्य किमपि अन्यत् लक्ष्यं भवितव्यम् । अतः अस्माकं कर्माणि केवलं शारीरिक-पालनपोषणार्थे प्रेरितानि मा भवेयुः । किन्तु अस्माभिः आत्मोद्धारार्थम् एकम् आध्यात्मिकलक्ष्यम् अपि निर्धारितव्यम् ।



एकादशगुरु-परमपूज्य-
श्रीमत्-सद्योजातशङ्कराश्रम-स्वामिवर्यः ।

तपः भवतः तितिक्षायाः सबलीकरणे साहाय्यकं भवति । तत् भवतः सर्वान् असम्बद्धान् प्रतिकूलान् च विषयान् उपेक्षितुं तान् त्यक्तुं च अध्यापयति । उदाहरणार्थं यदा मनः प्रातःकाले किञ्चित् ध्यानार्थं सत्वरम् उत्थातुं प्रतिरोधं करोति तदा स्वमनसः विरोधं कर्तुं प्रयत्नः अपि तपः एव अस्ति ।

गुरूपदेशानुवादः - पूर्णिमा कार्नाड , बेङ्गलूरु

## निवेदनम्

ॐ श्रीगुरुभ्यो नमः। ॐ श्रीभवानीशङ्कराय नमः। ॐ श्रीमात्रे नमः।

**सर्वश्रुतिशिरोरत्नविराजितपदाम्बुजम् ।
वेदान्तार्थप्रवक्तारं तस्मात्सम्पूजयेद् गुरुम् ॥**

आषाढमासे गुरुपूर्णिमायां प्रारब्ध-चातुर्मास-व्रतम् अस्माकं परमपूज्य-सद्योजात-शङ्कराश्रम-गुरुवर्याः श्रीवल्लीस्थित-चित्रापुरमठे आचरन्तः सन्ति । गुरुपूर्णिमा एकः प्रतीक्ष्यमाणः विशेषः अवसरः। प्रतिपदं मार्गदर्शनं , रक्षणञ्च कुर्वतः गुरुवर्यान् प्रति आदरं कृतज्ञताञ्च प्रकटयितुम् अयमेकः सुयोगः। गुरुपूर्णिमायां स्वामिनां दर्शनं प्राप्तुं , तेषां सान्निध्यम् अनुभवितुञ्च बहवः साधकाः श्रीवल्लीं प्रति प्रस्थानं कृतवन्तः । मठस्य समीपं गच्छद्भिः सर्वैः वातावरणे सूक्ष्मपरिवर्तनम् अनुभूतम् । प्रदूषणरहितः वायुः। सर्वत्र दृश्यमाना हरितिमा । विविधवर्ण-आकाराणां पुष्पाणि धारयन्त्यः दोलायमानाः वृक्षलताः । समन्तात् प्रसृतः तेषां सुगन्धः। प्रशान्तः नीरवः मठपरिसरः। स्फटिकप्रभ-जलेन परिपूरितः आह्लाददायकः शिवगङ्गासरोवरः । सर्वं रमणीयं , हृदयङ्गमञ्च ! मठं प्रविश्य तत्रस्थित-पवित्रस्पन्दनानाम् अनुभवं कुर्वन्तः सर्वे देव-देवी-समाधि-दर्शनं कृतवन्तः , श्रद्धया नमस्कृतवन्तः।

गुरुपूर्णिमादिने आयोजिते कार्यक्रमे देशविदेशतः नैके साधकाः सोत्साहं सहर्षञ्च सहभागं कृतवन्तः। परमपूज्य-गुरुवर्याणाम् आगमनसमये मठपरिसरः जयघोषेण तथा मन्त्रघोषेण उल्लसितः सञ्जातः । गुरुवर्याणां दिव्यकरकमलाभ्यां सुसम्पन्न-व्यासपूजनेन तथा तेषाम् अमृतवाण्याः सिञ्चनेन सर्वैः परमधन्यता अनुभूता । पादुकापूजनेन तथा गुरुवर्याणां दिव्य-करकमलाभ्यां तीर्थं सम्प्राप्य कृतकृत्याः जाताः सर्वे।

नवचैतन्येन आपूरितः चातुर्मासः आध्यात्मिकसाधनायाः तथा आत्मचिन्तनस्य कृते सुयोग्यम् अवसरं प्रददाति । नैके साधकाः अस्मिन् चातुर्मासे जपध्यानपठनादि साधनां वृद्धीकर्तुं सङ्कल्पिताः।

अस्मिन् पावनावसरे श्रीचरणकमलयोः इदं पत्रिकाकुसुमं सहर्षं सविनयञ्च समर्पयामः।

सम्पादिका

## चिन्तनम्

**– गौरी येन्नेमाडी , मुम्बई**

गतवर्षे गीर्वाणप्रतिष्ठया आयोजिते चिन्तने सामूहिक-साधनायाः महत्त्वम् इति विषयम् अधिकृत्य नैकैः स्वविचाराः प्रकटिताः। अस्य चिन्तनस्य सारांशः अधः दीयते ।

**- साधना इत्युक्ते किम् ?**

किमपि लक्ष्यं प्राप्तुं निष्ठया कृतः प्रयत्नः साधना इति उच्यते।

**- साधनायाः प्रारम्भस्य पूर्वं के के बिन्दवः चिन्तयितव्याः?**

१) चिते विषये विशेष-आसक्तिः अभिरुचिः च अतीव आवश्यकी । कोऽपि अन्यः तां साधनां कुर्वन् अस्ति अतः मयापि सा कर्तव्या ईदृशी भावना अयोग्या ।

२) किमर्थं साधनां करोमि ? मम लक्ष्यं किम् ? एतस्य विषये अन्तर्मुखः भूय आत्मनिरीक्षणं करणीयम् ।

३) साधनां कर्तुं मम शारीरिक-योग्यता आरोग्यं च सम्यक् भवेत् ।

४) कस्यापि साधनायाः कृते कियतः धनस्य आवश्यकता अस्ति? मम अर्जने तत् शक्यं वा ? यतः साधकस्य अन्यान्यपि कौटुम्बिक-कर्तव्यानि भवितुं शक्यन्ते येषां प्रति अपि अवधानं दातव्यम् । एतस्मिन् प्रसङ्गे लक्ष्यस्य प्राधान्यं ज्ञात्वा अन्यगौण-स्वाकाङ्क्षाणां त्यागं कर्तुं दृढनिर्धारः भवेत् ।

५) लक्ष्यं प्राप्तुं तीव्रा इच्छा, केषाञ्चित् नियमानां सातत्येन पालनम् , उत्तमम् आरोग्यम् इत्यादीनाम् आवश्यकता अस्ति ।

६) उत्तमः मार्गदर्शकः वा गुरुः वा भवेत् यः साधकं लक्ष्यं प्रति नेतुं समर्थः अस्ति। गुरुं प्रति श्रद्धा भक्तिः निष्ठा च भवेयुः । स्वदोषनिर्मूलनं , सातत्यम् इत्यादीनाम् अपि आवश्यकता अस्ति ।

**वैयक्तिक-साधना तथा सामूहिक-साधनयोः भेदः।**

१) वैयक्तिक-साधना स्वरुचिम् अनुसृत्य भवति । किन्तु सामूहिक-साधनायाः कृते समरुचि-समानताभाव-सङ्घटितभावना- तितिक्षा-वाक्संयमादीनां बिन्दूनां समीकरणं भवेत् । ईदृशं समायोजनं किञ्चित् क्लिष्टमेव खलु । पिण्डे पिण्डे मतिर्भिन्ना । तर्हि अत्र परस्परसहिष्णुता , स्वीकारस्वभावः, असूयात्यागः, अन्यान् प्रति प्रीत्यादरः , आत्मीयता , नियमपालनम् एतेषां गुणानां वर्धनं स्वयमेव भवति ।

२) सामूहिक-साधनायां सार्वजनिक-हितस्य कृते प्रार्थना भवति यस्यां स्वहितमपि अन्तर्गतमेव । अत्र मैत्री-भावना , आत्मीयता, परोपकारः इत्यादीनां सद्गुणानां वर्धनमपि शक्यम् । नूतनं कौशल्यं सुलभतया अधिगम्यते । यदि प्रत्येकस्य लक्ष्यं केन्द्रीभूतं तर्हि व्यर्थ-जल्पनस्य कृते कुतः सन्धिः ?

एवम् आध्यात्मिकमार्गे अग्रे गन्तुं सामूहिकी साधना अपि साहाय्यकी भवति।

## सुभाषितम्

**- पवन काप्राडक , चेन्नई**

**सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम् ।**
**प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः ॥**

**भावार्थः -**

सत्यं वदेत् , परन्तु तत् प्रियमपि भवेत् । अप्रियं सत्यं कदापि न वक्तव्यं , यदि असत्यं प्रियमस्ति तर्हि अपि न वदेत्।

एषः सनातनधर्मस्य मूलसिद्धान्तः अस्ति । एतस्य पालनं न भवति तर्हि वाग्दोषः भवति । सत्यवचनमपि कटू अस्ति चेत् हृदयभेदनं भवति मनः दुश्चित्तं भवति च । जीवनं केवलं तत्त्वज्ञानस्य कृते न , अपितु सौहार्दस्य निर्माणाय अपि अस्ति । वाक्-मनश्शुद्ध्योः योगः एव धर्मस्य सारभूतम् अङ्गम् अस्ति।

# पक्षिमित्राः भवाम ।

– शिल्पा मुद्गुर, मुम्बई

जूनमासः आसीत् । सूर्यः नीलमेघैः निलायनक्रीडां क्रीडन् आसीत् । गृहकार्यं कुर्वत्याः मम दृष्टिः वातायनात् बहिः गता । सहसा पुरतः स्थिते वृक्षे सुवर्णवर्णं किमपि दृष्टं, क्षणान्तरे च तत् हरित्पर्णेषु व्यपगतम् । किम् तद् इति ज्ञातुम् उत्सुका अहं यत्नतः निरीक्षितवती परं दुर्भाग्येन न पुनः तत् दृष्टम् । तथापि तस्य सुदीप्त-पीतवर्णः सम्यक् लक्षितमासीत् मया ।



अन्येद्युः प्रातःकाले पुनः आकाशः मेघैः आच्छादितः अभवत् । वर्षागम-काले पर्जन्यात् पूर्वं भवति तथा वातावरणमासीत् । अकस्मात् कोऽपि मञ्जुलध्वनिः श्रुतः । अहं सवेगं वातायनं प्रति धावितवती। दिष्ट्या ! वादामवृक्षस्य बृहत्पत्राणां मध्ये एकः सुवर्णपक्षी उपविष्टः आसीत् । सुदीप्तपीतं शरीरं, पक्षौ कृष्णवर्णीयौ, चञ्चुः पाटलवर्णीया, नेत्रम् अभितः कृष्णपटः च - विलक्षणमासीत् तस्य रूपम् । अहं प्रथमवारम् एतं खगं पश्यन्ती आसम् । तेन पुनः मधुरस्वरेण 'पियुपियो ... पीऽऽलोलो !' इति आहूतम् । अन्यवृक्षतः 'क्वीयाक्' इति श्रुतम् । क्षणान्तरे द्वौ खगौ ततः उड्डीय अन्यत्र गतौ, न च पुनः दृष्टौ ।

को वा एषः खगः इति कुतूहलेन झटिति मया अन्तर्जाले अन्वेषणं कृतम् । काञ्चनवर्णीयः अयम् आकर्षकः पक्षी 'पॅसेरिफॉर्मिस' (Passeriformes) गणस्य 'ओरिओलिडी' (Oriolidae) पक्षिकुले गण्यते । उपत्रिंशत् प्रजातयः यूरोप-आशिया-आफ्रिका-ऑस्ट्रेलिया-खण्डेषु दृश्यन्ते । भारतवर्षे दृश्यमानस्य Indian Golden Oriole इत्यस्य शास्त्रीयं नाम अस्ति ओरिओलस कुण्डू (Oriolus Kundu) इति । तस्य हरिद्रा इव सुदीप्तपीत-शरीरम् अतः सः हारिद्रवः अथवा काञ्चनः इति ज्ञायते । अन्यभारतीय-भाषासु 'हळद्या, हळदी, पीलक, सुवर्ण मञ्जू' इत्यपि तस्य नामानि ।



नरखगस्य शरीरं काञ्चनवर्णं, पक्षौ कालवर्णीयौ च । पक्षिणी अपि नरः इव दृश्यते परन्तु शरीरवर्णः

मन्दः हरित्पीतः च भवति, अधोभागे श्यावरेखाः वर्तन्ते । मध्यमकायः एषः खगः सारिकायाः अपेक्षया किञ्चित् बृहत् वर्तते । सः युगले अथवा एकलः निवसति । पर्णबहुलवृक्षेषु निवसतः अस्य खगस्य दर्शनं दुर्लभं, सः प्रायः भूमौ न आगच्छति । तारं परम् अतीव मधुरं तस्य कूजनम् । 'पीऽऽलोलो' इव स्वरेण सः अभिज्ञायते । अशनसमये 'कर् र् र्' इति ध्वनिं करोति ।

वनप्रान्तेषु, सदाहरितवनेषु, उद्यानेषु, फलवृक्षवाटिषु च तस्य अधिवासः । न्यग्रोध-पिप्पलादीनां फलानि, लघुकीटकान् च खादति, पुष्पेभ्यः मकरन्दं पिबति च ।

प्रायः एप्रिलतः ऑगस्टमासपर्यन्तं तस्य प्रजननकालः । पक्षिणी तृणैः वृक्षत्वचा च लघुचषकम् इव नीडं रचयति । तस्मिन् ३-४ अण्डानि स्थापयति । अण्डानां कुलायनिलायः, शावकानां भोजनरक्षणादि माता पिता उभौ च कुरुतः । ९ तः १० वर्षाणि यावत् काञ्चनपक्षिणः आयुः ।

एतत् सर्वं पठित्वा अहं अस्य सुन्दरखगस्य पुनर्दर्शनाकाङ्क्षिणी जाता । तस्मात् अनन्तरं नैकवारं काञ्चनपक्षिणः स्वरः श्रुतः दर्शनं चापि अभवत् । अस्माकं पार्श्वस्थे निवास-सङ्कुले एकस्मिन् उन्नते सुपर्णवृक्षे प्रतिवर्षम् एकः काञ्चनदम्पतिः निवसति स्म । विशेषतः पर्जन्यात् पूर्वं नरपक्षी पक्षिणीम् आकर्षयितुं गायति स्म । तस्य मञ्जुलं गीतं, तयोः परस्परक्रीडा, सवेगं वृक्षात् वृक्षम् उड्डयनं च ननु मनोहारि आसीत् सर्वम् ।

दुर्भाग्येन वर्षद्वयात् पूर्वं कैश्चन जनैः सः वृक्षः खण्डितः । तेन न केवलं काञ्चनपक्षिणाम् अपि तु नैकेषां खगानां गृहं विनष्टम् । तस्मात् अनन्तरम् अद्ययावत् तौ खगौ अस्माकं निवास-सङ्कुलं परितः मया न पुनः दृष्टौ । धिक् मानवस्य स्वार्थम् । निसर्गस्य तथा निसर्गे रममाणानां जीवानाम् आदरं न कुर्मः वयम् । यदि वयं स्वं परितः एतान् सुन्दरजीवान् द्रष्टुम् इच्छामः तर्हि तादृशः परिसरः निर्मातव्यः खलु । तदेव वयं वस्तुतः पक्षिमित्राः – न पक्षिणः मित्राणि अपि तु 'पक्षिणः मित्राणि येषां ते' भवेम ।

अद्यापि मम गृहस्य वातायनात् पक्षिनिरीक्षणं कुर्वती, कदा वा काञ्चनपक्षिणाम् मञ्जुल-कूजनं पुनः आकर्णयिष्यामि इति चिन्तयन्ती, तदेव आशासे - 'पक्षिमित्राः भवाम' ।

## प्रहेलिका ?

**– शीला कळावर, ठाणे**

**दन्तैर्हीनः शिलाभक्षी निर्जीवो बहुभाषकः ।**
**गुणस्यूतिसमृद्धोऽपि प्रसादेन गच्छति ॥**

( उत्तरम् अन्तिमपृष्ठे दत्तम् । )

# हिरकणी - मातृप्रेमस्य कालातीतकथा

– **मूललेखः - आदिता हट्टङ्गडी , मुम्बई**
**अनुवादः - सङ्गीता पवार , मुम्बई**

अहं हिरकणी इत्यस्याः अविश्वसनीयकथाम् अत्र वक्तुम् इच्छामि । एतस्याः अलौकिक-महिलायाः विषये लिखित्वा अहम् आत्मानम् अतीव गौरवान्विता भाग्यशालिनी मन्ये । तस्याः कथा प्रेम्णा आदरेण च कथयितुं मया यथाशक्ति प्रयत्नः कृतः , यदि कापि त्रुटिः भवति चेत् क्षम्यताम् । महाराष्ट्रस्य समृद्धसांस्कृतिक-इतिहासस्य यात्रायां मया सह आगच्छन्तु ।

इतिहासेन  संस्कृत्या च समृद्धस्य  महाराष्ट्रस्य, महाराष्ट्रीयजनानां प्रेमस्य निष्ठायाः च आख्यानं कुलपरम्परासु अद्ययावत् प्रचलति। वीर-गोपी-हिरकणी इत्यस्याः मातुः अप्रतिबद्ध-अहेतुक-निःसीमप्रेमस्य कथा कालातीतसन्देशेन नैकान् वंशान् प्रेरयन्ती अस्ति ।

छत्रपतिशिवाजीमहाराजस्य राज्यकाले हिरकणी रायगडदुर्गस्य तले निवसति स्म, तत्रस्थ-ग्रामीण-दुर्गस्थितजनेषु दुग्धं वितरति स्म ।
कोजागिरीपर्वदिने सा रायगडदुर्गे दुग्धं प्रदातुं गतवती । परन्तु तस्याः प्रत्यागमनं विलम्बितम् । अतः सा सूर्यास्तात् पूर्वं गृहं प्राप्तुम् असमर्था अभवत् । तदा नियमानुसारं दुर्गस्य द्वाराणि पिहितानि ।  तस्याः नवजातशिशुं स्मरन्ती सा दुर्गप्रमुखं बहुवारं द्वारस्य उद्घाटनार्थे याचितवती । परन्तु सः तस्याः याचनाः निराकृतवान् । दुःखिता द्वारोद्घाटनस्य प्रतीक्षमाणा सा शिलाप्रस्तरस्य शिखरे स्थित्वा अधः ग्रामं निर्निमेषं दृष्टवती ।



आह्वानात्मकः भूभागः विद्यमानः अपि हिरकणी दुर्गस्य प्रस्तरमार्गेण अवरोहणस्य दृढनिश्चयं कृतवती । तस्याः दृढनिश्चयः भक्तिः च ताम् अग्रे प्रेषितवत्यौ। सा शनैः शनैः शिलारन्ध्रं दृढं गृहीत्वा प्रस्तरात् अधः यात्राम् आरब्धवती । वायुः उच्चैः अगर्जयत्, सूर्ये अस्तङ्गते सर्वत्र अन्धःकारः । परन्तु हिरकणी स्वबालकं मेलितुम् अधिरा स्वसुरक्षाम् उपेक्ष्य निरन्तरम् दुर्गमदुर्गस्य अवरोहणं कृतवती ।

यदा सा तलं प्राप्तवती तस्याः क्षुधार्तः शिशुः तस्याः उपस्थितिं ज्ञात्वा  क्रन्दितवान् । हिरकणी वेगेन धावित्वा तं शिशुम्  आलिङ्ग्य स्तनपानं च कारितवती । स्वस्य बालस्य क्षुधां शमयित्वा तस्य रोदनं शान्तं  कृतवती । इतिहासे उत्कीर्णः अयं भावपूर्णः क्षणः मातुः स्थायिसमर्पणं वात्सल्यस्य मधुरसम्बन्धं च चित्रयति ।

हिरकण्याः निःस्वार्थसाहसेन प्रेरितः छत्रपति-शिवाजी-महाराजः तं कन्दरं (cliff) "हिरकणी-बुरुज" इति नाम्ना सम्बोध्य तां सम्मानितवान् । तस्याः शौर्यस्य एतत् साक्ष्यं प्रमाणं चिरकालं जनान् प्रेरयिष्यति ।

हिरकण्याः सम्प्रत्तिः (legacy) महाराष्ट्रस्य सांस्कृतिक-इतिहासस्य कृते महत्त्वपूर्णा अस्ति, तस्याः अविश्वसनीयं साहसम् अस्मान् प्रेरयति ।

तस्याः आख्याने मातुः वात्सल्यस्य असीमशक्तिः, कठिनतमपरिस्थितौ दृढसङ्कल्पस्य प्रतिबद्धतायाः च विजयं स्पष्टतया दर्शयति ।

एकं निमेषं यावत् एकस्याः शूरवीर-मातुः हिरकण्याः असीमस्नेहस्य असामान्यशौर्यस्य च प्रशंसां कुर्मः। तस्याः आख्यानम् अस्मान् निरन्तरं प्रेरयति अस्मासु रुचिं जनयति च ।

## गीर्वाणप्रतिष्ठातः ...



गीर्वाणप्रतिष्ठायाः शिक्षकाः निरपेक्ष-सेवारूपेण श्रद्धया संस्कृतप्रचारस्य तथा प्रसारस्य कार्यं कुर्वन्तः सन्ति। तेषु वरिष्ठतमः अस्ति श्री. उप्पोणीशरदमहोदयः। पञ्चनवती-वर्षीयः सः गतविंशतिवर्षेभ्यः सततं श्रीचित्रापुर-मठस्य संस्कृत-पाठ्यक्रमान् पाठयन् अस्ति। सः पूर्वम् अभियन्तारूपेण कार्यं कृतवान्। पाठशालायां संस्कृते तस्य रुचिः आसीत् । अतः निवृत्तेः अनन्तरं सः मठस्य अभ्यासक्रमान् पठितवान् । धारणाभ्यासक्रमानन्तरं पाठनम् आरब्धं तेन । अतीव लोकप्रियः शिक्षकः सः। तस्य एकस्मिन् वर्गे पञ्चाशताधिकाः छात्राः आसन्। शरदमहोदयस्य स्वभावः अपि अतीव मधुरः। अतः सः शिक्षकेषु छात्रेष्वपि अत्यन्तः लोकप्रियः । अधुना सः पाठनात् निवृत्तिं स्वीकृतवान्। गीर्वाणप्रतिष्ठा-अध्यक्षः श्री. चैतन्यगुलवाडीमहोदयः उप्पोणीशरदमहोदयस्य एतस्य योगदानस्य कृते सद्यः प्रीत्यादरेण सत्कारं कृतवान्।

वयं गीर्वाणप्रतिष्ठायाः शिक्षकाः उप्पोणीमहोदयाय शुभकामनाः अर्पयामः तथा अस्माकं गुरुचरणकमलयोः तस्य उत्तमारोग्यार्थं तथा दीर्घायोः कृते प्रार्थयामः।

# अनुशासनत्रयम्

– वैशाली कोप्पीकर , बेङ्गलूरु

देवाः मनुष्याः असुराः च प्राजापत्याः । ते ब्रह्मचर्यं परिपालयन्तः पितरि प्रजापतौ उषितवन्तः । ब्रह्मचर्यं पालयित्वा देवाः पितरं तान् उपदेष्टुं प्रार्थितवन्तः । पिता 'द' इति अक्षरम् उवाच पृष्टवान् च ज्ञातं किम् ? ते अवदन् 'आम्' ज्ञातमिति । 'दाम्यत ' इति । तदा पिता 'ॐ' इति अवदत् ।

मनुष्याः एनं याचितवन्तः ," अस्मान् उपदिशतु भवानिति।" प्रजापतिः 'द' इत्यक्षरमेव उपदिष्टवान् । "अपि अवगतम् ? " इति पृष्टवान् । " अवगतम् ' दत्त ' इति ननु " इति उक्तवन्तः । ' भवद्भिः ज्ञातम् ' इति पिता उक्तवान् ।

असुराः पितरम् उपदेशार्थं प्रार्थनां कृतवन्तः। ताम् अपि 'द' इत्येव अक्षरप्रदानं कृतवान् पिता । दयध्वमिति दकारस्य अर्थं तैः प्राप्य पिता सन्तुष्टः। तदेतदेवैषा दैवीवाग् ददद इति अनुवदति स्तनयित्नुः। तदेतत्त्रयं शिक्षेत दमं , दानं , दयामिति ।

एवं निरङ्कुशानां देवानां धनलोलुपानां मनुष्याणां निर्दयिनाम् असुराणां स्वभावज्ञः तेषां पिता प्रजापतिः तेभ्यः दकारोपदेशं कृतवान् ।

देवाः अपि क्षीणे पुण्ये मर्त्यलोकं प्रविशन्ति इत्यतः तेषां परब्रह्मप्राप्त्यर्थम् अवरोधकारकं कामं ते त्यजेयुः इति विचिन्त्य तेषां कृते दाम्यत इति दकारोपदेशः कृतः।

धनलोलुपतया बद्धानां मनुष्याणां परब्रह्मप्राप्तिः अपरिग्रहेणैव इति ज्ञात्वैव पिता प्रजापतिः दकारेण दानार्थं बोधितवान् । असुराणां निर्दयत्वमेव ब्रह्म प्राप्तौ बाधा इति विज्ञाय तान् अपि दयध्वमिति दकारेण सूचितवान् पिता । उपदेशत्रयमपि साम्प्रतं ज्ञापयन् भवति स्तनयित्नुः ।

बृहदारण्यकोपनिषदि व्याख्याता एषा कथा त्रिकालाबाधिता अस्ति । बृहदारण्यकोपनिषदः पञ्चमे अध्याये द्वितीये ब्राह्मणे एषा कथा वर्तते । इन्द्रियनिग्रहस्य अनुशासनत्रयम् अत्र उल्लिखितम् अस्ति।

# अन्धगजन्यायः

– सुमन हिरेबेट , बेङ्गलूरु

कश्चन अन्धानां समूहः गच्छन् अस्ति । मार्गे गच्छद्भिः जनैः तत्र स्थितस्य गजस्य विषयः श्रूयते - अतः अन्धाः कुतूहलेन गजं प्रति गत्वा, तं स्पृष्ट्वा नन्दन्ति।

एकः अन्धः गजस्य शुण्डं स्पृष्ट्वा "अहो, गजः सुदृढः दोलायमानः नागः" इति उच्चैः वदति। अपरः अन्धः गजस्य दीर्घं दन्तं स्पृष्ट्वा "गजः शूलवत्" इति वदति। अन्यः अन्धः गजस्य देहं स्पृष्ट्वा "न! गजः साक्षात् भित्तिरेव" इति वदति। अन्यः अन्धः कर्णं स्पृष्ट्वा -"गजः विशालः व्यजनवत्" इति वदति ।

एवं प्रत्येकः मानवः स्वानुभवरेव सत्यमिति प्रतिपादयति। स्वतर्कानुसारं सः वस्तुस्थितिं सत्यं गृहीत्वा निष्कर्षम् अनुमानञ्च करोति। तत् प्रमाणीकरोति।

तदा एषः अन्धगजन्यायः इति उच्यते ।

बालरञ्जनी

# शिवभक्तः चेन्तनारः

– सुधा कार्नाड , बेङ्गलूरु



चेन्तनारः नाम एकः कुठारिकः ( woodcutter) शिवभक्तः आसीत् । निर्धनः सः काष्ठानि विक्रीय यथाशक्ति स्वस्य अल्पसञ्चित-धनधान्येन भोजनं पक्त्वा कमपि स्वगृहम् आहूय प्रेम्णा सहभोजनं करोति स्म। एषः आसीत् तस्य दैनन्दिनक्रमः।

एकदा वृष्ट्याः कारणात् सः काष्ठानि विक्रेतुं न शक्तः। अतः भोजनसाधनानि क्रेतुं तस्य समीपे धनं नासीत् । यत् क्षुद्रधान्यं (millets ) गृहे आसीत् तेन सः क्षीरपाकम् अपचत्। सहभोजनं कर्तुं कोऽपि आगच्छति वा इति प्रतीक्षाम् अकरोत् । किन्तु तस्मिन् दिने कोऽपि न आगतः।

चेन्तनारः सहभोजनं कर्तुं कमपि प्रेषयतु इति इष्टदेवं शिवं प्रार्थितवान् । तदा करुणामयः शिवः एव अतिथिरूपेण तस्य गृहम् अगच्छत् । आगताय अथितये चेन्तनारेण भोजनं प्रीत्या परिवेषितम् । स्वभक्तस्य परीक्षां कर्तुं शिवः " इतोऽपि क्षीरपाकम् इच्छामि " इत्युक्तवान् । चेन्तनारः स्वस्य कृते स्थापितं क्षीरपाकम् अथितये आनन्देन परिवेषितवान् । एतेन सन्तुष्टः शिवः तस्मै आशीर्वादान् दत्त्वा ततः निर्गतवान् ।

शिवस्य अन्यः एकः भक्तः आसीत् तञ्जावूर राज्यस्य राजकुमारः। सः प्रतिदिनं श्रद्धया चिदम्बर-मन्दिरस्य नटराज-शिवस्य पूजनं करोति स्म ।

पूजायाः समापने जाते नूपुराणां नादश्रवणेन शिवस्य सन्तुष्ट्याः प्रमाणं तेन प्राप्यते स्म । किन्तु किम् आश्चर्यम् । यस्मिन् दिने चेन्तनारस्य गृहं शिवः गतवान् तस्मिन् दिने राजकुमारेण नूपुरनादः न श्रुतः । सः व्यथितः जातः। तस्यां रात्रौ शिवः राजकुमारस्य स्वप्ने आगत्य चेन्तनारस्य विषयं तस्मै कथितवान्।

अन्येद्युः राजकुमारः चेन्तनारम् अन्वेष्टुं भटान् आदिष्टवान् । यदा चिदम्बर-मन्दिरस्य द्वारम् अर्चकाः उद्घाटितवन्तः तदा किम् आश्चर्यम् ! नटराज-मूर्तिः क्षीरपाकेन लिप्ता आसीत्।


ईदृशी आसीत् चेन्तनारस्य शिवभक्तिः तथा एवम् आसीत् स्वभक्तं प्रति शिवस्य प्रीतिः।

(श्रीचित्रापुरमठस्य **'परिज्ञान-फौण्डेशन'** द्वाराप्रकाशितात् **'शिवसायुज्यम्-60 Stories of Shiva'** इति पुस्तकात् ।)

## बालरञ्जनी

### शब्दपटः

– सुधा कार्नाड , बेङ्गलूरु




**वामतः दक्षिणम्**

१) अतिथीन् आहूय चेन्तनारः किं करोति स्म ?

२) राज्ञः पुत्रः।

३) शिवस्य कुठारिकः भक्तः।

४) कस्मिन् राज्यस्य राजकुमारः शिवस्य अन्यः भक्तः आसीत्।

५) कस्मिन् स्थले शिवमन्दिरम् आसीत्?

**उपरिष्टात् अधः**

६) भोजनं पक्तुम् एतानि आवश्यकानि।

७) चिदम्बरं-मन्दिरस्य आराध्य देवः।

८) शिवपूजायाः अनन्तरं राजकुमारः एतं श्रुणोति स्म ।

९) इदम् आङ्ग्ल भाषायां millets इति वदन्ति।

( उत्तराणि अन्तिम-पृष्ठे दत्तानि )

## हास्यकणिका

सुजाता हळदीपुर , मुम्बई

**आवेदनपत्रम्...**
प्रिय प्रबन्धकमहोदय!
अहं कोविड-ज्वरेण पीडितः अतः भवन्तम् अनुरोधं करोमि यत् मह्यं ३० दिनानाम् अवकाशं ददातु ।
अन्यथा अहं कार्यालयम् आगमिष्यामि।
सादरं,
प्यारेलालः



----------------------------

**कार्यालयतः ...**
प्रिय प्यारेलाल,
भवान् कोविड्-सङ्क्रमितः इति ज्ञात्वा वयं तत्क्षणमेव अन्यान् सर्वान् कर्मचारिणः गृहादेव कार्यं कर्तुम् आदिष्टवन्तः । अतः भवान् कार्यालयम् आगम्य निश्चिन्त्य भूय कार्यं करोतु ।
प्रेम्णा
प्रबन्धकः

## रुचिरा

# गजबजॅ सुक्कॅ

**- काञ्चन होनावर , मुम्बई**

अनन्त-चतुर्दशी-दिने अस्माकं चित्रापुर-मठे निर्धारित-देवालये मध्याह्ने १४ विशेष-पदार्थानां व्यञ्जनस्य नैवेद्यं भवति। एतदस्ति गजबजॅ सुक्कॅ - यत् स्वादिष्ठं , रुचिकरं , जीवसत्त्वपूर्णञ्च च यस्य प्रसाद-रूपेण वितरणं भवति।

### साहित्यम् –

निम्नलिखितशाकाः प्रत्येकाः १०० ग्राम-परिमिताः -

१) सूरणः( elephant yam)
२)कुष्माण्डः( pumpkin)
३) कलायः( peas)
४)शकरकन्दः ( sweet potato)
५) आलुकम् ( potato )
६) शिग्रुः ( drumstick)
७) भिण्डीनकम् (lady finger)
८) वृन्ताकः ( brinjal)
९) रक्तफलम् ( tomato)
१०) पठोलः (snake gourd)
११) कोशातकी( ridge gourd)
१२) हरित-शाकं ( green amaranth)
१३) रक्त-शाकम् ( red amaranth)
१४) अपक्व - कदलीफलम् ( raw banana)

### पेषणसाहित्यम् -

घर्षित-नारिकेलम् - अर्धकटोरपरिमितम्
बेड्गी-मरीचिका - ३
सर्षपः - द्वि-चमस-परमितः
तुम्बुरुः (तेप्पल) - ६
हरिद्रा - १/४ लघुचमसपरिमिता
धनेयकम् - १/२ चमसपरिमितम्
नारिकेलतैलम् - त्रिचमसपरिमितम्
माषः - चमसद्वयपरिमितः
हिङ्गुः - १/४ चमसपरिमितः
गुडः - १/२ चमसपरिमितः
तिन्त्रिणी - स्वादानुसारम्
लवणम् - स्वादानुसारम्



### कृतिः

स्वल्पजले तुम्बुरून् स्थापयित्वा किञ्चित् क्वथयन्तु । भर्जनपात्रे किञ्चित् तैलम् उष्णीकुर्वन्तु । तस्मिन् धनेयकानि मरीचिकाः माषान् च किञ्चित् भर्जयन्तु । एतद् अन्य-पेषण-साहित्येन सह (तुम्बुरून् विहाय) पेषयन्तु ।

चुल्लिकायां पात्रं स्थापयित्वा तस्मिन् तैलम् उष्णं करोतु । तैले एकैकशः - सर्षपान् , हिङ्गुं , गिरिनिम्बपत्राणि च - योजयन्तु । यदा व्याघरणं सिद्धं भवति तदा तस्मिन् शाकखण्डान् ईषत् पचन्तु । तेषु शाकेषु पेषितं मिश्रणं योजयन्तु । स्वादानुसारं लवणं गुडञ्च योजयन्तु । तुम्बरून् उष्णजलेन सहितम् अस्मिन् योजयन्तु । सम्यक् आलोडनं कृत्वा मन्दाग्नौ पचन्तु ।

सत्त्वपूर्णं , स्वादिष्ठं च ' गजबजॅ सुक्कॅ ' नैवेद्यार्थं सिद्धम् ।



# कैवल्योपनिषदि सप्तदशः श्लोकः

**– कृष्णानन्द मङ्कीकर , मुम्बई**

पूर्ववर्तिनि संस्करणे अस्माभिः दृष्टं यत् ब्रह्म एव सर्वात्मा इति । सर्वात्मा इति **सर्वस्य आत्मा इति सर्वस्य प्राणः**। विश्वस्य आयतनं **सर्वस्य आधारः** । सूक्ष्मात् सूक्ष्मतरं ब्रह्म – इदमपि अस्माभिः दृष्टं भवान्याः स्तुतौ **"प्रपञ्चात्परं च अतिसूक्ष्मं प्रसन्नम्"** इति । जीवात्मपरमात्मनोः भेदः नास्ति इत्यपि अस्माभिः दृष्टम् ।

भवान्याः स्तुतौ, प्रपञ्चः समष्टिदृष्ट्या (Macrocosm) निर्दिष्टः। यत् इदं सर्वम् अस्माभिः दृष्टं वा अदृष्टं जगत् यथा पञ्चमहाभूतानि, अखिला जीवसृष्टिः, ग्रहमालाः, तारकाः, अनेकाः आकाशगङ्गाः, येषां कल्पनामपि कर्तुं वयमसमर्थाः स एव अयं प्रपञ्चः।

कैवल्योपनिषदि , सप्तदशे श्लोके , वयं प्रपञ्चस्य अन्यदेव रूपं पश्यामः ।

**जाग्रत्स्वप्नसुषुप्त्यादि प्रपञ्चं यत्प्रकाशते ।**
**तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥ १७ ॥**

अत्र, प्रपञ्चः **"जाग्रत्स्वप्नसुषुप्त्यादि"** इति वर्णितः । अस्माकं शास्त्रेषु जागृति-स्वप्न-निद्रा इति तिस्रः अवस्थाः कथिताः जीवात्मनः । जागृत्यवस्थायां जीवः यत्पश्यति, यस्य अनुभूतिं करोति, सः जागृत्यवस्थाप्रपञ्चः। स्वप्नावस्थायां जीवः स्वयमेव प्रपञ्चनिर्माणं करोति । अयं प्रपञ्चः स्वप्नावस्थायाः निर्गते जीवे स्वयमेव विनष्टीभवति । निद्रावस्थायां तु कोऽपि " प्रपञ्चः " नास्ति किन्तु एका सुखावस्था एव । अस्याः आकलनं जागृत्यवस्थायां स्मरणमात्रेण एव अनुभूतम् । अयं सर्वः त्रिषु अवस्थासु अनुभूतः व्यष्टिस्वरूपः (microcosm) प्रपञ्चः । अपरः उपरिनिर्दिष्टः (प्रपञ्चात्परम् इत्यादि) समष्टिस्वरूपः । व्यष्टिस्वरूपः प्रपञ्चः प्रत्येकस्य जीवस्य भिन्नः। एतावानयं **"प्रपञ्चः"** यस्मात् "कारणात्" जीवात्मना अनुभूयते तत् **महाकारणमेव ब्रह्म**, इति अत्र प्रतिपादितम् ।

द्वितीये पादे मुनिः कथयति, इदं कारणं, यत् मह्यं व्यष्टिप्रपञ्चः प्रकाशते, अथवा मम "प्रपञ्चस्य" नियन्ता अस्ति, तदेव ब्रह्म । तथा तदेव "अहम्" इति ज्ञातव्यम् । तद्ब्रह्म प्रपञ्चः **"प्रकाशते"** इति मननस्य विषयः। वयं ब्रह्म द्रष्टुं न शक्नुमः किन्तु तदेव महत्कारणं तथा अहमेव तस्य ब्रह्मणः अंशः वा प्रतिबिम्बं वा इति दृढा श्रद्धा धर्तव्या ।

यदा अहम् इदं (अहमेव ब्रह्म इति) सम्यक् जानामि तदा अहं सर्वबन्धैः प्रमुच्ये इत्यत्रोक्तं मुनिना । कथमिदं शक्यम् ? किमिदं ज्ञानं यत् सर्वबन्धैः प्रमुच्यते? अस्मिन् श्लोके यदुक्तं तस्य मतितार्थं पश्यामः । अयं प्रपञ्चः ब्रह्मणा एव सञ्चालितः । अहं तु न मम कर्मणां कर्ता । यदा अयं भावः दृढीभवति तदा शनैः शनैः मम कर्तृत्वभावना तथा च आसक्तिभावनाऽपि क्षीणे भवेताम् । तदैव , " मम कर्तृत्वम् " इति भावे नष्टे सति , जीवात्मा कर्मानुबन्धान्मुक्तः भवति । तदेव **"सर्वबन्धैः प्रमुच्यते"** इत्यस्य सङ्क्षिप्ता व्याख्या ।

इत्यलम् । शुभं भवतु ।

# मम स्मृतिपथे...

– मूललेखः - नक्षत्र सारस्वत , जयपुर
अनुवादः - शरयू हल्दीपुर , मुम्बई

चित्तौडगढनगरे परमपूज्य-श्रीमत् सद्योजात-शङ्कराश्रम- स्वामिनाम् आगमनम् ...

शिरालिस्थित-श्रीचित्रापुरमठस्य एकादशमठाधिपतेः परमपूज्य- श्रीमत् सद्योजात-शङ्कराश्रम- स्वामिनां चित्तौडगढनगरयात्रा , मार्चमासस्य नवमदिने आरब्धा । एषः मम जीवने लब्धेषु श्रेष्ठतमानुभवेषु एकः अविस्मरणीयः क्षणः अभवत् ।

अस्मिन्नेव वर्षे मम दशमकक्षायाः परीक्षा समाप्य अहं विमुक्तः अभवम् । स्वामिनां दर्शनार्थम् अहं , मम कुटुम्बजनाः च उत्सुकाः आतुराश्च आस्म। 'पद्मिनी' इत्याख्ये आवासे स्वामिनां पूर्णकुम्भेन स्वागत-पादप्रक्षालनं च जातम् । तदेव आसीत् अस्माकं कृते चरणामृतम् ।

दश-मार्चे डॉ. चैतन्यगुलवाडी-महोदयेन चित्रापुरमठस्य च गुरुपरम्परायाः विषये प्रस्तुतिः प्रदत्ता , येन वयं सारस्वतसमाजस्य विषये बहुज्ञानं प्राप्तवन्तः । ततः सभा आरब्धा, स्वागतभाषणानन्तरं पादुकापूजनं जातम् । मया अपि मातृपितृभ्यां सह एषः सु-अवसरः लब्धः। आशीर्वचने स्वामिभिः साधनायाः , योगस्य , जपस्य च महत्त्वं प्रतिपादितम्। मधुरया वाचा सुन्दरं भजनमपि गीतवन्तः। तीर्थवितरणं सम्पन्नं जातम् । तीर्थस्य प्राशनेन शरीरे उत्साहः सञ्चारितः। सायङ्काले शिवस्य १०८ नामभिः विधिविधानपूर्वकं शिवपूजनं पूज्यस्वामिभिः कृतम्।

एकादशमार्चे प्रातः अहं शरयू हल्दीपुरपाच्या सह सुप्रभातं पठित्वा प्राणायामं व्यायामं च कृतवान्। अनन्तरं स्वामिनः साधकैः सह वयं च चित्तौडगढदुर्गं कालिकामन्दिरं च दृष्टवन्तः । सायङ्काले वयं सर्वे साँवरियासेठ-मन्दिरं गतवन्तः। तत्र दर्शनं लब्ध्वा स्वामिवर्यैः पूजनं कृतम् । अनन्तरं वयं पुनः पद्मिनी-आवासस्थाने प्रतिनिवृत्ताः।

द्वादशमार्चे प्रातः अहं शीघ्रम् उत्थाय प्रशिक्षणस्थलं प्राप्य सुप्रभातं, प्राणायामं, व्यायामं च कृतवान् । दशवादने महापूजा अभवत् , या मम कृते परमाऽनुभूतिः। यदा ज्ञातं स्वामिनां जयपुरं गन्तुं कार्यक्रमः अस्ति, मनसि शोकः जातः। नेत्राभ्याम् अश्रूणि अवहन् । स्वामिवर्याणां समीपं गत्वा, तेषां मधुरस्मित-मुखमण्डलस्य दर्शनं प्राप्तवान् । ते मम नाम पृष्टवन्तः । " नक्षत्र " इत्यहम् उक्तवान्। ते अवदन् " बहु उत्तमम्! " तेभ्यः छायाचित्रं, सेवफलं , तीर्थं च मया प्राप्तानि। मया सङ्कल्पः कृतः यत् प्रतिदिनं गायत्रीमन्त्रस्य एकां मालां जपं करिष्यामि। सात्त्विकं जीवनञ्च यापयिष्यामि। एषः त्रिदिवसीयशिविरस्य अनुभवः मया कदापि न विस्मरिष्यते। मध्याह्ने स्वामीवर्यः जयपुरं प्रति प्रस्थितवन्तः। गमनसमये “ पुनः आगमिष्यामि परन्तु यूयं सर्वे अपि कदाचित् शिरालीम् आगच्छेत " इति वचनम् अपि अवदन् ।

## योगविषये किञ्चित् ...

**लेखः – मीनाक्षी बलजेकर , ठाणे**
**अनुवादः – वैशाली कोप्पीकर , बेङ्गलूरु**



# कूर्मासनम्

भवन्तः सर्वे पूर्वोक्तं भद्रासनं कृतवन्तः एव स्युः। अस्मिन् कूर्मासने ततः अग्रे गन्तव्यम्।

**कृतिः –**
कूर्मासनार्थं प्रथमं कटस्योपरि पादौ सरलं संस्थाप्य उपवेष्टव्यम् । पृष्ठवंशोऽपि सरलः स्यात् । द्वयोः पादयोः यावदधिकं शक्यं तावदन्तरः भवतु । निःश्वसन् शनैः पृष्ठवंशतः अधः नतः भवन् द्वावपि हस्तौ ( दक्षिणहस्तं दक्षिणपाददिशि, वामहस्तं वामपाददिशि ) द्वयोः पादयोः ( सक्थिनोः, ऊर्वोः ) अधःस्ताद् पृष्ठभागदिशि नेतव्यौ यथा चित्रे निर्दिष्टम्।

**लाभाः –**
भद्रासने उक्तान् लाभान् प्राप्नुवन्ति । मनसः चञ्चलता समाप्य एकाग्रता वर्धते। पचनशक्तिः अपि वर्धते। पादयोः स्नायवः बलशालिनः भवन्ति । तथा च पृष्ठवंशस्य अनुकूलशीलता, नम्यता वर्धते ।

**वर्ज्यम् –**
कटिवेदना येषां ते एतमासनं न कुर्युः।

## उत्तराणि

**शब्दपटः** वामतः दक्षिणम् **१ सहभोजनम् २ राजकुमारः ३ चेन्तनारः ४ तञ्जावूर ५ चिदम्बरम्**
उपरिष्टात् अधः **६ भोजनसाधननि ७ नटराजः ८ नुपूरनादम् ९ क्षुद्रधान्यम्**

**प्रहेलिका** **पादत्राणम्**

**सम्पादिका –** वरदा सौकूर
**पृष्ठरचना –** वन्दना बळवळ्ळी
**सम्पादकीयसमितिः –** शीला कळावर , दुर्गा कुम्टा , अर्चना काप्राडक , सुधा कार्नाड , शिल्पा मुदूर
**सम्पादकीयसाहाय्यम् –** तेजश्री बैलूर

**अभिप्रायं तथा लेखं प्रेषयितुम् इच्छुकानाङ्कृते सम्पर्कः -**
**Email id: girvanapatrika@chitrapurmath.net.in** (लेखार्थं शब्दमर्यादा-२५०)

**गीर्वाणप्रतिष्ठायाः संस्कृताध्ययनार्थं संस्कृत-सम्भाषणार्थं च जालाधारित-वर्गाः प्रचलन्ति । पञ्जीकरणाय आवेदन-पत्रस्य सम्पर्क-सूत्रम्**
**https://chitrapurmath.net/site/activities-girvanaprathistha-online-classes**

Scan QR Code
for Enquiry Form